# ॥ શ્રીમહાવાક્યાર્થબોધઃ ॥

.. shrImahAvAkyArthabodhaH ..

sanskritdocuments.org

August 20, 2017

# .. shrImahAvAkyArthabodhaH ..

# ॥ શ્રીમહાવાક્યાર્થબોધઃ ॥

## Sanskrit Document Information

Text title : mahAvAkyArthabodhaH

File name : mahAvAkyArthabodhaH.itx

Category : deities_misc, dattatreya

Location : doc_deities_misc

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Source : Dattapurana

Latest update : March 24, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીમહાવાક્યાર્થબોધઃ ॥

શ્રીગણેશાય નમઃ ।
ત્વામગ્રે રવિચન્દ્રાદેર્ભાસકં લોકચાલકમ્ ।
પૃચ્છામીદં કથં જ્ઞાનમાપ્નુયાં દયયા વદ ॥ ૧॥

ઇતિ પૃષ્ટોઽર્જુનેનાહ શ્રીદત્તઃ શૃણુ ભૂપતે ।
યદેકં પરમં બ્રહ્મ નિત્યમુક્તમવિક્રિયમ્ ॥ ૨॥

તત્સ્વશક્તિસમાવિષ્ટમીશમાહુર્મનીષિણઃ ।
સ વિષ્ણુઃ સ શિવો બ્રહ્મા સોઽગ્નિરિન્દ્રઃ સ્વરાડ્ હરિઃ ॥ ૩॥

ધાતા કાલઃ ક્રિયા કર્તા જીવનં મૃત્યુરામયઃ ।
નારાયણો હૃષીકેશો ભૂતં ભવ્યં ભવચ્ચ સઃ ॥ ૪॥

વસ્તુમાત્રમિદં સર્વમહમેવાસ્મિ સર્વદૃક્ ।
અહમેવ પરં ધ્યેયં મિથ્યાભ્રમનિવૃત્તયે ॥ ૫॥

ભ્રમસ્યાપિ ચ નામાનિ કલ્પિતાનિ શૃણુષ્વ તત્ ।
માયાવિદ્યા પરા દેવી મનોઽનાદિર્ભ્રમસ્ત્રિવૃત્ ॥ ૬॥

પ્રધાનં પ્રકૃતિર્બ્રહ્મ  યોનિઃ શક્તિશ્ચ કારણમ્ ।
મોહોઽધ્યાસસ્તમોઽજ્ઞાનં પ્રસ્વાપઃ કારણં ત્વિદમ્ ॥ ૭॥

અતોઽવિદ્યા પઞ્ચપર્વા મહામોહો દ્વિરૂપકઃ ।
વિક્ષેપાવૃતિશક્ત્યાખ્ય આદ્યાત્સર્ગોઽત્ર ભૌતિકઃ ॥ ૮॥

સ્વરૂપમાવૃણોત્યન્યો મુક્તં ચેશં વિના ભૃશમ્ ।
યોઽવિદ્યાર્તોઽવશો દુઃખી ભ્રાન્તોઽજ્ઞો જીવ એવ સઃ ॥ ૯॥

સમષ્ટિરીશઃ સર્વજ્ઞો વશમાયઃ સ્વરાટ્ સુખઃ ।
અસત્વાભાનાખ્યભક્તાવૃતિહૃદ્ગુરુરપ્યસૌ ॥ ૧૦॥

મતં મૂઢૈર્જગન્નિત્યં તથા જીવેશયોર્ભિદા ।
એવં ભેદત્રયેણેદં ભાતં વસ્ત્વેવ માયયા ॥ ૧૧॥

તન્નિવૃત્ત્યૈ કૃતા વેદૈઃ સૃષ્ટિપ્રલયકલ્પના ।
મૂઢસ્ય સા મતા સત્યા ભ્રમોઽયં લીયતે વિદા ॥ ૧૨॥

જ્ઞાનં વિદ્યેતિ તાં પ્રાહુર્દ્વેધા વિદ્યા વિચારજા ।
પરોક્ષા ચાપરોક્ષેતિ તત્રાદ્યા ગુરુવક્ત્રતઃ ॥ ૧૩॥

અમાનિત્વાદિયુક્તૈઃ સા વિજ્ઞેયા સાધનાન્વિતૈઃ ।
ગુરુભક્તિં વિના સાપિ દુર્લભા મોક્ષદાયિની ॥ ૧૪॥

યસ્ય દેવે પરા ભક્તિર્યથા દેવે તથા ગુરૌ ।
તસ્યૈતે કથિતા હ્યર્થાઃ પ્રકાશન્તે મહાત્મનઃ ॥ ૧૫॥

ગુર્વનુગ્રહમાત્રેણ વિચારઃ સુલભો નૃણામ્ ।
વિચારેણ પરં તત્ત્વં સ્વયમેવ પ્રકાશતે ॥ ૧૬॥

રાજંસ્ત્વયારિવલં કર્મ યોગયાગાદિકં મયિ ।
સમર્પિતં તતોઽયં તે વિચારોઽદ્ય સમુત્થિતઃ ॥ ૧૭॥

વૈરાગ્યં પરમં જાતં ભ્રમમોહમલાપહમ્ ।
અતો વિદ્યાપ્રસાદસ્તે ભવિષ્યત્યચિરેણ હિ ॥ ૧૮॥

વિદ્યા જ્ઞેયા પરોક્ષેયં વેદાન્તશ્રવણાત્મિકા ।
ઉપક્રમાદિભિર્લિઙ્ગૈર્યત્તાત્પર્યાવધારણમ્ ॥ ૧૯॥

તદેવ શ્રવણં તત્તુ હરેત્સંશયભાવનામ્ ।
અસત્ત્વાવરણં ચાપિ વસ્ત્વસ્તીતિ તદેક્ષતે ॥ ૨૦॥

મનનં કાર્યમસ્યેદમાશ્વસમ્ભાવનાહરમ્ ।
વશીકારાખ્યવૈરાગ્યયુક્તસ્યેદં સુખાવહમ્ ॥ ૨૧॥

આત્મૈવ નેહ નાનાસ્તિ મોહિતસ્ય જગત્ત્વિદમ્ ।
ભાતિ નાન્યસ્ય મિથ્યેદં સ્વપ્નો નિદ્રાગમે યથા ॥ ૨૨॥

વિષયાન્ધ્યાયતો યદ્વન્મનોરથપરમ્પરા ।
અસત્યેવ સદા ભાતિ નાનાવિષયગોચરા ॥ ૨૩॥

પરમાત્મૈક એવાહં વસ્તુમાત્રશ્ચિદાત્મકઃ ।
મયિ મિથ્યાવિભાગોઽયં દૃશ્યતેઽનાદ્યવિદ્યયા ॥ ૨૪॥

ભ્રમો મોહો મહામાયા પ્રધાનં પ્રકૃતિર્મનઃ ।
અજ્ઞાનં શક્તિરવ્યક્તં ગુણસામ્યમિતીરિતા ॥ ૨૫॥

સૈવ મિથ્યામતિર્યસ્યા ઇદં ભાતં ચરાચરમ્ ।

એવં વિચારશ્રવણાનુસારિ મનનં તુ તત્ ॥ ૨૬॥

સચ્ચિદાનન્દલક્ષ્માપિ પરાત્મા માયયાऽऽવૃતઃ ।
નિજં સ્વરૂપં વિસ્મૃત્ય યયેદં દૃશ્યતે જગત્ ॥ ૨૭॥

મહાંસ્તતોऽહમસ્તસ્માત્તન્માત્રાણિ તતઃ ક્રમાત્ ।
ભૂતેન્દ્રિયસુરાણાં ચ સર્ગસ્ત્વામાऽહમઃ ક્રમાત્ ॥ ૨૮॥

ન હ્યત્ર નિયમો રાજન્નસત્યે માનસભ્રમે ।
કદાચિદ્યુગપત્સૃષ્ટિઃ ક્રમસૃષ્ટિઃ કદાચન ॥ ૨૯॥

દેહાઃ સુરાસુરનરતિરશ્ચાં ભૌતિકા ઇમે ।
સ્થૂલૈઃ સ્થૂલાનિ સૂક્ષ્મૈશ્ચ સૂક્ષ્માણ્યેવં ભવોદ્ભવઃ ॥ ૩૦॥

ઉપક્રમોऽયમાખ્યાત ઉપસંહાર ઉચ્યતે ।
ભૂતેષુ ભૌતિકાનહિ ક્રમાદ્યોગી વિલાપયેત્ ॥ ૩૧॥

પૃથ્વી જલે જલં વહ્નૌ વહ્નિર્વાયૌ સ ખે ચ ખમ્ ।
અહમિ પ્રાણગો દેવા મનશ્ચાપિ સ્વકારણે ॥ ૩૨॥

અહઙ્કારોऽપિ મહતિ સોऽવ્યક્તે તચ્ચ નિષ્કલે ।
સ એવાહં પરાત્મૈકઃ શુદ્ધો મુક્ત ઉપાધિતઃ ॥ ૩૩॥

એવં નિદિધ્યાસનત એકઃ સ્વાત્મૈવ શિષ્યતે ।
તસ્માન્નાસ્ત્યપરં કિઞ્ચિદાત્મૈવાયં યથા તથા ॥ ૩૪॥

રાજન્મમ પ્રસાદાત્ત્વં ખલુ ધન્યોऽસ્યસંશયમ્ ।
અન્તઃકરણશુદ્ધિસ્તે જાતા વૈરાગ્યમુત્તમમ્ ॥ ૩૫॥

મયિ ભક્તિર્દૃઢા પ્રેમ્ણા શ્રવણં ચાપિ વિસ્તરાત્ ।
પ્રપઞ્ચસ્થાપિ ચિત્તસ્થા સર્વથા વિલયં ગતા ॥ ૩૬॥

તત્ત્વમેકં પરં બ્રહ્મ ન દ્વિતીયં કદાપિ હિ ।
એવં શમાદિરૂપાં તામારૂઢો ભવ ભૂમિકામ્ ॥ ૩૭॥

ત્વં સાક્ષાત્કારસૂપાયક્રમં વિદ્ધ્યથ ભૂપતે ।
દત્તચિત્તો ભવાદ્યાત્ર તત્ત્વનિશ્ચયકારક ॥ ૩૮॥

સર્વસાધનસમ્પન્નઃ પુરુષો જાતનિશ્ચયઃ ।
શ્રોત્રિયં બ્રહ્મનિષ્ઠં તં સદ્ગુરું શરણં વ્રજેત્ ॥ ૩૯॥

તત્ત્વમસ્યાદિવાક્યર્થમુપદિષ્ટં તુ ષડ્વિધૈઃ ।
લિઙ્ગૈર્ધિયા સમાલોચ્ય બુધઃ સમવધારયેત્ ॥ ૪૦॥

શ્રવણં ત્વિદમેવોક્તં તત્સમાસેન તે બ્રુવે ।
યતસ્ત્વં શિષ્યતાં પ્રાપ્તો મત્સેવાહતકિલ્બિષઃ ॥ ૪૧॥

તત્પદેન પરં બ્રહ્મ ત્વમ્પદેન ચ પૂરુષમ્ ।
અનૂદ્યૈક્યં તયોર્ભૂપ બોધ્યતેઽસિપદેન સત્ ॥ ૪૨॥

વિરુદ્ધસ્ય ત્વમર્થસ્ય તદર્થત્વં કથ ભવેત્ ।
ઇતિ ચેચ્છૃણુ રાજેન્દ્ર તયોરૈક્યે નિદર્શનમ્ ॥ ૪૩॥

દેવદત્તઃ ક્વચિદ્દૃષ્ટો યુવા દેશાન્તરે સ ચ ।
પુનર્દૃષ્ટો જરાં પ્રાપ્તઃ સોઽયમિત્યવધાર્યતે ॥ ૪૪॥

પૂર્વદેશમવસ્થાં ચ ત્યક્ત્વેદં તસ્ય વાર્દ્ધકમ્ ।
દેશં ચાપિ યથૈકેન પિણ્ડેનૈક્યં પ્રતીયતે ॥ ૪૫॥

ત્યક્ત્વા દ્વ્યંશૌ તથાઽત્રાપિ વાક્ય ઐક્યં હિ લક્ષ્યતે ।
ત્વમ્પદસ્ય ચ વાચ્યાર્થઃ સંસારીતિ સુનિશ્ચિતઃ ॥ ૪૬॥

કર્તા ભોક્તા સુખી દુઃખી માયયૈવ ન તત્ત્વતઃ ।
દેહેન્દ્રિયમનઃપ્રાણાહઙ્કારેભ્યો વિલક્ષણઃ ॥ ૪૭॥

વસ્તુતઃ સચ્ચિદાનન્દસ્વરૂપો ગુણગોચરઃ ।
એકાંશસ્તત્ર ચિદ્રૂપમન્યઃ સંસારિતાઽસ્ય ચ ॥ ૪૮॥

એવં ત્વમર્થં નિશ્ચિત્ય તદર્થમપિ નિશ્ચિનુ ।
અતદ્વ્યાવૃત્ત્યા વિધિના સાક્ષાચ્ચ શ્રુતિયુક્તિતઃ ॥ ૪૯॥

તત્પદસ્ય ચ વાચ્યાર્થઃ સર્વજ્ઞઃ પરમેશ્વરઃ ।
તસ્યૈકોંઽશોઽપિ ચિદ્રૂપં સર્વજ્ઞત્વાદિ ચાપરઃ ॥ ૫૦॥

ત્યક્ત્વા વિરુદ્ધવાચ્યાંશદ્વયં જીવેશયોરિહ ।
લક્ષ્યૌ ચિદંશૌ નિર્બાધં પદયોરુભયોરપિ ॥ ૫૧॥

અવિરુદ્ધં તયોરૈક્યં લક્ષણાલક્ષિતં દ્વયોઃ ।
વાક્યાર્થોઽયં સુનિષ્પન્નસ્ત્વં બ્રહ્મ પરમં હિ તત્ ॥ ૫૨॥

તદેવ ત્વં પરં બ્રહ્મ નાસ્તિ ભેદઃ કથઞ્ચન ।
અખણ્ડૈકરસત્વેન વાક્યાર્થોઽત્ર સતાં મતઃ ॥ ૫૩॥

વિશેષ્યં ત્વમ્પદં તસ્ય તત્પદં ચ વિશેષણમ્ ।
નિરસ્યતેઽસ્ય દુઃખિત્વં સુખિત્વં ચ વિધીયતે ॥ ૫૪॥

વૈપરીત્યેન વિજ્ઞેયં વિશેષ્યં તત્પદં તથા ।
વિશેષણં ત્વમ્પદં ચ પારોક્ષ્યસ્ય નિરાસકૃત્ ॥ ૫૫॥

તદ્બ્રહ્મ પરમં શુદ્ધં ત્વમાત્મૈવ નિરામયઃ ।
ઇત્યૈક્યં ભૂપ વિજ્ઞેયં વેદોક્તં ગુર્વનુગ્રહાત્ ॥ ૫૬॥

સ્વાત્મૈક્યાર્થમિયં પ્રોક્તા સુધીભિર્ભાગલક્ષણા ।
ત્રિકાણ્ડેનાપિ વેદેન સોઽયમર્થો વિનિશ્ચિતઃ ॥ ૫૭॥

સ્થૂલધીભિઃ સુદુર્જ્ઞેયો વિજ્ઞેયો હિ મનીષિભિઃ ।
પર્યવસ્યન્તિ વેદાદ્યા અત્રૈવ વિવિધા અપિ ॥ ૫૮॥

શાસ્ત્રતત્ત્વમવિજ્ઞાય મૂઢાઃ શાસ્ત્રાણિ સર્વશઃ ।
તે પ્રવૃત્તિપરાણ્યેવ કથયન્તિ કુતર્કતઃ ॥ ૫૯॥

ઉપક્રમોપસંહારાવભ્યાસોઽપૂર્વતા ફલમ્ ।
અર્થવાદોપપત્તી ચ લિઙ્ગં તાત્પર્યનિર્ણયે ॥ ૬૦॥

પ્રાક્ સદૈવેત્યુપક્રમ્યૈતદાત્મ્યમિદમેવ સત્ ।
ઉપસંહૃતમિત્યેકમભ્યાસો નવધા પરમ્ ॥ ૬૧॥

શાબ્દેનૈવ હ્યખણ્ડાર્થવિનયત્વં તૃતીયકમ્ ।
તુર્યં વિદેહકૈવલ્યં પ્રારબ્ધાન્તે વિવેકિનઃ ॥ ૬૨॥

ષષ્ઠં મૃદાદિદૃષ્ટાન્તૈર્નિર્ણયસ્તૂપપત્તિકમ્ ।
સૃષ્ટિસ્થિત્યન્તપ્રવેશાનિયમઃ શોધનં ફલમ્ ॥ ૬૩॥

સપ્તાર્થવાદાસ્તદ્રૂપં પઞ્ચમં લિઙ્ગમુચ્યતે ।
સર્વસ્યાત્મન ઉત્પત્તેરવસ્થાનાચ્ચ તત્ર હિ ॥ ૬૪॥

પુનર્લયાજ્જગૌ વેદઃ કારણબ્રહ્મમાત્રતામ્ ।
સૂર્યસ્યેવ જલે ચાત્ર પ્રવેશમપિ ચાત્ર તુ ॥ ૬૫॥

અન્તર્યામિતયા ભેદાત્સદા નિયમનં સ્મૃતમ્ ।

તથા રોહિતરૂપાદ્યૈઃ પદાર્થપરિશોધનમ્ ॥ ૬૬॥

અભેદજ્ઞાનસ્ય પરં સ્વાત્મૈક્યમમૃતં ફલમ્ ।
એવં સપ્તાર્થવાદાત્મલક્ષણં પઞ્ચમં મતમ્ ॥ ૬૭॥

ષડ્લિઙ્ગૈરિતિ તાત્પર્યાવધૃતિઃ શ્રવણં સ્મૃતમ્ ।
આસ્થાયાથો યોગભૂમિં મનનાદિ ચરેદ્બુધઃ ॥ ૬૮॥

ઇતિ દત્તપુરાણે શ્રમિહાવાક્યાર્થબોધઃ સમ્પૂર્ણઃ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrImahAvAkyArthabodhaH ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*